प्राणत्यक्तं मृतं दृष्ट्वा मृत्युञ्च लभते ध्रुवम्। मत्स्यादि-भारणं यो हि तद्भ्रातुर्मरणं भवेत्। छिन्नं भयङ्करं वापि विकृतं मुक्तकेशिनम्। क्षिप्रं नृत्यञ्च कुर्वन्तं दृष्ट्वा मृत्युं लभेन्नरः। मृतो वापि मृता वापि कृष्णा म्लेच्छा भयानका। उपगूहति यं स्वप्ने तस्य मृत्युर्विनिश्चितम्। उपगूहति यं स्वप्ने शृङ्गिणो दंष्ट्रिणोऽपि वा। बालका मानवाश्चैव तस्य राजकुलाद्भयम्। छिन्नवृक्षं पतन्तञ्च शिलावृष्टिं तुषं चुरम्। रक्ताङ्गारं भस्मवृष्टिं दृष्ट्वा दुःखमवाप्नुयात्। गृहं पतन्तं शैलं वा धूमकेतुं भयानकम्। भग्नं स्कन्धं तरोर्वापि दृष्ट्वा दुःखमवाप्नुयात्। रथगेहवृक्षशैलगोहस्तितुरगोऽम्बरात्। भूमौ पतति यत्स्वप्ने विपत्तिस्तस्य निश्चितम्। उच्चैः पतन्ति गर्त्तेषु भस्माङ्गारचितासु च। क्षारकुण्डेषु चूर्णेषु मृत्युस्तेषां न संशयः। बलाद्गृह्णाति दृष्टञ्च छत्रञ्च यस्य मस्तकात्। पितुर्नाशो भवेत्तस्य गुरोर्वापि नृपस्य वा। सुरभी यस्य गेहाञ्च याति त्रस्ता सवत्सिका। प्रयाति पातकस्तस्य लक्ष्मीरपि वसुन्धरा। पाशेन कृत्वा बद्धञ्च यं गृहीत्वा प्रयान्ति च। यमदूताश्च ये म्लेच्छास्तस्य मृत्युर्विनिश्चितम्। गणको ब्राह्मणो वापि ब्राह्मणी वा गुरुस्तथा। परिरुष्टः शपति यं विपत्तिस्तस्य निश्चितम्। विरोधिनश्च काकास्तु कुक्कुरा भल्लुकास्तथा। पतन्त्यागत्य यद्गात्रे तस्य मृत्युर्न संशयः। महिषा भल्लुका उष्ट्राः शूकरा गर्द्दभास्तथा। रुष्टा धावन्ति यं स्वप्ने स रोगी निश्चितं भवेत्"।

अस्य शान्तिस्तत्रोक्ता यथा

"रक्तचन्दनकाष्ठानि घृताक्तानि च यो जुहेत्। गायत्र्या च सहस्रेण तेन शान्तिर्विधीयते। सहस्रधा जपेद् यो हि भक्त्या मां मधुसूदनम्। निष्पापो हि भवेत् सोऽपि दुःस्वप्नः सुस्वप्नो भवेत्। अच्युतं केशवं विष्णुं हरिं सत्यं जनार्दनम्। हंसं नारायणञ्चैव एतन्नामाष्टकं शुभम्। शुचिः पूर्वमुखः प्राज्ञो दशकृत्वश्च यो जपेत्। निष्पापो हि भवेत् सोऽपि दुःस्वप्नः सुस्वप्नो भवेत्"। स्वापसमयलग्ने दुःस्वप्नसूचकग्रहयोगभेदः नी०ल०त० उक्तो यथा

"लग्नांशपेऽर्कें तनुगेऽथ वाऽस्मिन् दुःस्वप्नमीक्षेत यथा कविस्वम्। रक्ताम्बरं वह्निमथापि चन्द्रे इत्येवमादि"।

"प्रोह्यते भक्ष्यते वापि पिशाचासुरवायसैः। भूतैः प्रेतैः श्वभिर्ध्वाङ्क्षैर्गोमायुखरसूकरैः। सरभैः करभैः कोशैः श्येनैरश्वतरैर्वृकैः। स्वप्ने स जीवितं त्यक्त्वा वर्षान्ते यममीक्षते। गन्धपुष्पांशुकैः शोणैः स्वात्मानं भूषिताम्बरः। यः पश्येत् स्वप्नसमये सोऽष्टौ मासाननित्यहो" काशीख०अधिकं कालचिह्नशब्दे १९९७पृ०दृश्यम्

**दुकूल** न० दु—उलच् कुक् च दुष्टं कूलति कूल—आवरणे क वा पृषो०। १क्षौमाम्बरे २सूक्ष्मवस्त्रे ३स्वच्छवस्त्रे च मेदि०। "गोपवधूटीदुकूलचौराय" भाषा० "अथ सवल्क दुकूलकुथादिभिः" भट्टिः। "वधूदुकूलं कलहंसलक्षणम्" कुमा०।

**दुगूल** न० दुकूल+पृषो०। दुकूलार्थे पट्टवस्त्रे हेमच०।

**दुग्ध** न०दुह—क्त। १पयसि क्षीरे स्त्रीजातिस्तननिष्यन्दिद्रवद्रव्ये। कर्मणि क्त। २कृतदोहायां धेन्वादौ स्त्री ३प्रपूरिते त्रि०मेदिनी०। भावे क्त। ४दोहने न० क्षीरवर्गशब्दे २३७७पृ० अस्य विवृतिः। तत्रानुक्तं भावप्र० उक्तं किंचिदत्राभिधीयते

"रात्रौ चन्द्रगुणाधिक्याद्व्यायामाकरणात्तथा। प्राभातिकं तदा प्रायः प्रादोषाद्गुरु शीतलम्। दिवाकरकराघातात् व्यायामानलसेवनात्। प्राभातिकात्तु प्रादोषं लघु वातकफापहम्"। अथ दुग्धसेवने समयादिविशेषे गुणमाह। "वृष्यं वृंहणमग्निदीपनकरं पूर्वाह्णकाले पयो मध्याह्ने तु बलावहं कफहरं पित्तापहं दीपनम्। बाले वृद्धिकरं क्षये क्षयकरं वृद्धेषु रेतोवहम् रात्रौ पथ्यमनेकदोषशमनं क्षीरं सदा सेव्यते। वदन्ति पेयं निशि केवलं पयो भोज्यं न तेनेह सहौदनादिकम्। भवत्यजीर्णे निशि पीतशर्करा क्षीराल्पपानस्य न शेषमुत्सृजेत्। विदाहीन्यन्नपानानि दिवा भुङ्क्ते हि यन्नरः। तद्विदाहप्रशान्त्यर्थं रात्रौ क्षीरं सदा पिबेत्। दीप्तानले कृशे पुंसि वातवृद्धे पयःप्रिये। मतं हिततमं पथ्यं सद्यः शुक्रकरं यतः"। अथ मथितस्य दुग्धस्य गुणाः "क्षीरं गव्यमथाजं कोष्णं दण्डाहतं पिबेत्। लघु वृष्यं ज्वरहरं वातपित्तकफापहम्"। अथ गोजदुग्धगुणाः "गोदुग्धप्रभवं किं वा छागीदुग्धसमुद्भवम्। तद्भवेत्त्रिदोषघ्नं रोचनं बलवर्द्धनम्। वह्निवृद्धिकरं वृष्यं सद्यस्तृप्तिकरं लघु। अतीसारेऽग्निमान्द्ये च ज्वरे जीर्णे प्रशस्यते"। अथ निन्दितदुग्धम् "विवर्णं विरसं चाम्लं दुर्गन्धं ग्रथितं पयः। वर्जयेदम्ललवणयुक्तं कुष्ठादिहेतुतः"। अजादिदुग्धगुणादिभेदादिकं तत्तच्छब्दे उक्तम्।